ISSN : 2582-9092

# सूर्यादिग्रहाणां कारकविमर्शः

**विष्णुप्रसाद डी. शर्मा**

## प्रस्तावना –

ज्योतिषशास्त्रे कारकविषये गर्ग–पराशर–जैमिनि–वराहमिहिर–कल्याणवर्म– गणेशदैवज्ञ ज्योर्तिविद्भिः प्रतिपादिताः भावानां विचाराः प्रस्तूयन्ते। कारकं द्विविधम् नियमितानियमितभेदात् तथा भावग्रहकारकौ इति। कारकं ज्यौतिषफलादेशस्य मूलाधारः वर्तते। प्रत्येकभावेषु दर्शनाय विभिन्नग्रहाणां विभिन्नविषयेषु कारकत्वं दत्तमस्ति। एतेषां कारकग्रहाणं प्रकृतेः अनुसारं च फलप्रदानरीतेः अनुसारेण ऋषयः फलितज्यौतिषे वैशिष्ट्यं प्रतिपादितवन्तः।

## विश्लेषण –

विभिन्नग्रन्थानुसारं कारकविचारः यथा – मूलत्रिकोण स्वगृहोच्चसंस्था नभस्वराः केन्द्रगतामिथः स्युः। ते कारकाख्या मुनिभिः प्रणीता विज्ञेय आज्ञाभवने विशेषः।। (जातकाभरणम्–कारकयोग–१) यद्यपि ग्रहाः स्वकीयमूलत्रिकोणराशीनां अथवा स्वउच्च राश्यां केन्द्रस्थाने (१–४–७–१०) तिष्ठन्ति तदा ते ग्रहाः परस्परं कारकाः भवन्ति, अर्थात् शुभकारक योगो भवति तथा जन्मकुण्डल्यां मध्ये दशमस्थाने कारकग्रहाः तिष्ठन्ति तदा ते ग्रहाः परस्परं कारकाः भवन्ति अर्थात् शुभकारक योगो भवति, तथा जन्मकुण्डल्यां मध्ये दशम–स्थाने कारकग्रहाः तिष्ठन्ति तदा विशिष्ट कारकाः मन्यन्ते इति जातकाभरणमतेन।

रवितनयो जूकस्थः कुलीरलग्ने बृहस्पति हिमांशू। मेषे कुजो रक्युितः परस्परं कारका एते।। सारावली – ६/१ कर्कलग्ने शनितुलायां गुरूचन्द्रौ कर्के राश्यां–मेषराश्यां भौमः – सूर्यः च तिष्ठति तदा ते ग्रहाः परस्परग्रहकारकाः भवन्ति अर्थात् राज्यप्रदः भवति। जातकस्य कुण्डलीमध्ये केन्द्रस्थाने स्वराश्यां स्थितेषु ग्रहाः कारकाः भवन्ति।

नीचकुले संभूतः कारकविहगैः प्रधानतां याति। क्षितिपतिवंश समुत्थो भवति नरेन्द्रो न सन्देहः।। जन्मकाले पूर्वकथितग्रहानुसारं कारकयोगः विधते। नीचवंशे समुत्पन्नस्यापि तदा सः जातकः प्रधानः राजा वा भवति।

**कारकयोगाय अधोनिर्दिष्टा नियमाः भवन्तिः।**

ग्रहाः यदि उच्चस्था मूलत्रिकोणस्थाः स्वराशिस्थाः च परस्परं केन्द्रेषु भवन्ति तदा कारकयोगः भवति। एवं कारकयोगे ग्रहाः परस्परं राशिपरिवर्तनं कुर्वन्ति तेन च कुत्रवित् उत्तमफलप्रदाने असमर्था भवन्ति। केषाञ्चन महापुरूषाणां लब्धप्रतिष्ठितानां कुण्डल्यां कारकयोगत्वात् कीर्तिभाजोऽपि ते दुःखभाज भवन्ति। इदं तथ्यं भगवतः रामचन्द्रस्यं कुण्डलीदर्शनेन स्वयमेव जायते। अति च द्वयोः उच्चग्रहयोः मूलत्रिकोणयोः स्वगृहस्थयोः एकः ग्रहः अन्यग्रहात् दशमे भवति। विशिष्टकारकयोगः भवति।

**सूर्यादिग्रहाणां कारकत्वं :–**

- **सूर्यः**– पितुः प्रतापस्य–आरोगस्य–मनसरु–पवित्रतायाः इच्छायाः ज्ञानोदय–आत्मस्वभावस्य–देहशक्तेः लक्ष्म्या च प्रथम–नवमस्थानयोः कारकः भवति।
- **चन्द्रः**– यशसः दयायाः–हर्षस्य कान्तेः मुखकोमलतायाः मातुः–चित्तस्ये बुद्धेः राजप्रसादस्य सम्पतेः तथा चतुर्थ स्थानस्य च कारकः भवति।
- **भौमः**– पराक्रमस्य–विजयस्य–सङ्ग्रामस्य–सेनापतेः शस्त्रस्य–गंभीरतायाः–देह कामक्रोधयोः–भूग्याः पुत्राणां जातेः तथा तृतीय–षष्ठस्थानयोः च कारकः भवति।
- **बुधः**– सन्ततेः शान्तेः नम्रतायाः भक्तेः मातुलस्य बान्धवस्य–सगोत्रस्य–समृद्धेः गणितस्य–वेदांतस्य–मित्राणां–वाण्याः च चतुर्थ स्थानस्य कारकः भवति।
- **गुरूः**– विधायाः–मन्त्रस्य वेदशास्त्रज्ञानस्य–कर्मयोगस्य–पुत्रस्य–सम्पत्तेः–धनस्य तथा द्वितीय–पंचम–नवम–दशम–एकादश स्थानानां च कारकः भवति।
- **शुक्रः**– गायनस्य–काव्यस्य–अद्भूतरसस्य–कामदेवस्य–स्त्रियाः–कामक्रीडा–विलासस्य–सुन्दरतायाः राजपुरूषस्य गुप्तविधायाः–वाहनस्य–कामचेष्टायाः–सुखस्य तथा सप्तमस्थानस्य च कारकः भवति।
- **शनिः** – मोहस्य–लोभस्य–परपीडायाः निष्ठुरतायाः पुण्यस्य–दुर्बुद्धेः–दरिद्रतायाः दुर्दशायाः रोगस्य कृष्णधनस्य–मृत्योः कारणस्य–विपत्तेश्व तथा षष्ठम् अष्ठम् दशम–द्वादश स्थानानां कारकः भवित।
- **राहुः** – यशसः–प्रतिष्ठायाः पितामहस्य च कारकः भवति।
- **केतुः** – मातामहस्य कारकः भवति।

**अर्कारमन्दफल(ण) यो पुमांश्च, जैमिनीसूत्रम्**

यदि केन्द्रे वा त्रिकोणस्थानमध्ये सूर्यः–भौमः–शनिः–राहुः वा विषमराशिमध्ये तिष्ठति तदा पुत्रसन्ततिकारकः भवति।

**चन्द्रबुधाभ्यां स्त्री च, जैमिनीसूत्रम्**

यदि केन्द्रे वा त्रिकोणस्थाने चन्द्र–बुधौ तिष्ठतुः तदा कन्यासंततिकारकः भवति। अतः कारकयोगाधारेण शुभाशुभफलं विधते।

**विष्णुप्रसाद दुर्गाप्रसाद शर्मा, वडोदरासन्दर्भ ग्रन्थाः**

ISSN : 2582-9092

पेज नं. 281 – कारक योगो

(1) **जातका भरणम्** – पं. दुष्ठीराज

प्रकाशन – 1992 संवत, किशनलाल द्वारकाप्रसाद मथुरा (उ.प्र.)

(2) **सारावली** – श्रीमल्कल्याणवर्यः

प्रकाशन – 1977, मोतीलाल बनारसीदास, वाराणसी, सारावली 6 श्लोक अध्याय – 1

(3) **जैमिनी सूत्रम** – डॉ. सुरेशचन्द्र मिश्रः

प्रकाशन – 1996, रंजन पब्लिकेशन्स – नई दिल्ली

**शोध छात्र**

**संस्कृत महाविद्यालय,**

एम.एस. यूनिवर्सिटी,

वडोदरा – गुजरात